# Chapter 16

Daivasura Sampad Vibhaga Yoga

## अथ षोडशोऽध्यायः

श्रीभगवानुवाच ।
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १६-१ ॥

śrībhagavān uvāca |
abhayaṃ sattvasaṃśuddhir jñānayogavyavasthitiḥ |
dānaṃ damaś ca yajñaś ca svādhyāyas tapa ārjavam ||16-1||

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ १६-२ ॥

ahiṃsā satyam akrodhas tyāgaḥ śāntir apaiśunam |
dayā bhūteṣv aloluptvaṃ mārdavaṃ hrīr acāpalam ||16-2||

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥ १६-३ ॥

tejaḥ kṣamā dhṛtiḥ śaucam adroho nātimānitā |
bhavanti saṃpadaṃ daivīm abhijātasya bhārata ||16-3||

दम्भो दर्पो ऽतिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ १६-४ ॥

dambho darpo 'timānaś ca krodhaḥ pāruṣyam eva ca |
ajñānaṃ cābhijātasya pārtha saṃpadam āsurīm ||16-4||

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातो ऽसि पाण्डव ॥ १६-५ ॥

daivī saṃpad vimokṣāya nibandhāyāsurī matā |
mā śucaḥ saṃpadaṃ daivīm abhijāto 'si pāṇḍava ||16-5||

द्वौ भूतसर्गौ लोके ऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ १६-६ ॥

dvau bhūtasargau loke 'smin daiva āsura eva ca |
daivo vistaraśaḥ prokta āsuraṃ pārtha me śṛṇu ||16-6||

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ १६-७ ॥

pravṛttiṃ ca nivṛttiṃ ca janā na vidur āsurāḥ |

na śaucaṃ nāpi cācāro na satyaṃ teṣu vidyate ||16-7||

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ १६-८ ॥

asatyam apratiṣṭhaṃ te jagad āhur anīśvaram |
aparasparasaṃbhūtaṃ kim anyat kāmahaitukam ||16-8||

एतां दृष्टिमवष्टभ्य नष्टात्मानो ऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतो ऽहिताः ॥ १६-९ ॥

etāṃ dṛṣṭim avaṣṭabhya naṣṭātmāno 'lpabuddhayaḥ |
prabhavanty ugrakarmāṇaḥ kṣayāya jagato 'hitāḥ ||16-9||

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्ते ऽशुचिव्रताः ॥ १६-१० ॥

kāmam āśritya duṣpūraṃ dambhamānamadānvitāḥ |
mohād gṛhītvāsadgrāhān pravartante 'śucivratāḥ ||16-10||

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ १६-११ ॥

cintām aparimeyāṃ ca pralayāntām upāśritāḥ |
kāmopabhogaparamā etāvad iti niścitāḥ ||16-11||

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १६-१२ ॥

āśāpāśaśatair baddhāḥ kāmakrodhaparāyaṇāḥ |
īhante kāmabhogārtham anyāyenārthasaṃcayān ||16-12||

इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १६-१३ ॥

idam adya mayā labdham idaṃ prāpsye manoratham |
idam astīdam api me bhaviṣyati punar dhanam ||16-13||

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरो ऽहमहं भोगी सिद्धो ऽहं बलवान्सुखी ॥ १६-१४ ॥

asau mayā hataḥ śatrur haniṣye cāparān api |
īśvaro 'ham ahaṃ bhogī siddho 'haṃ balavān sukhī ||16-14||

आढ्यो ऽभिजनवानस्मि को ऽन्यो ऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१६-१५॥

ādhyo 'bhijanavān asmi ko 'nyo 'sti sadṛśo mayā |
yakṣye dāsyāmi modiṣya ity ajñānavimohitāḥ ||16-15||

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरके ऽशुचौ ॥१६-१६॥

anekacittavibhrāntā mohajālasamāvṛtāḥ |
prasaktāḥ kāmabhogeṣu patanti narake 'śucau ||16-16||

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१६-१७॥

ātmasaṃbhāvitāḥ stabdhā dhanamānamadānvitāḥ |
yajante nāmayajñais te dambhenāvidhipūrvakam ||16-17||

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तो ऽभ्यसूयकाः ॥१६-१८॥

ahaṃkāraṃ balaṃ darpaṃ kāmaṃ krodhaṃ ca saṃśritāḥ |
mām ātmaparadeheṣu pradviṣanto 'bhyasūyakāḥ ||16-18||

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१६-१९॥

tān ahaṃ dviṣataḥ krūrān saṃsāreṣu narādhamān |
kṣipāmy ajasram aśubhān āsurīṣv eva yoniṣu ||16-19||

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥१६-२०॥

āsurīṃ yonim āpannā mūḍhā janmani janmani |
mām aprāpyaiva kaunteya tato yānty adhamāṃ gatim ||16-20||

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥१६-२१॥

trividhaṃ narakasyedaṃ dvāraṃ nāśanam ātmanaḥ |
kāmaḥ krodhas tathā lobhas tasmād etat trayaṃ tyajet ||16-21||

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥१६-२२॥

etair vimuktaḥ kaunteya tamodvārais tribhir naraḥ |
ācaraty ātmanaḥ śreyas tato yāti parāṃ gatim ||16-22||

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥१६-२३॥

yaḥ śāstravidhim utsṛjya vartate kāmakārataḥ |
na sa siddhim avāpnoti na sukhaṃ na parāṃ gatim ||16-23||

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥१६-२४॥

tasmāc chāstraṃ pramāṇaṃ te kāryākāryavyavasthitau |
jñātvā śāstravidhānoktaṃ karma kartum ihārhasi ||16-24||



ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः